ब्राह्मणे ब्रूयात् निरोङ्कारं महीपतौ । उपांशु च तथा वैश्ये शूद्रे स्वस्ति प्रयोजयेत्” उद्वा०त० यमोक्तः ।

**पुण्योदका** स्त्री पुण्यजनकं स्नानदानादुदकं यस्याः । नदीभेदे भा०अनु० १२०अ० । [पुन्नामन्शब्दे तद्व्युत्पत्तिर्दृश्या ।

**पुत्** न० “निपरणाद्वा पुत्” निरु०पृ—बा०डुति पृषो०। नरकभेदे

**पुत्त** गतौ सौ०भ्वा०पर०सक० सेट् । पुत्तति अपुत्तीत् पुपुत्त ।

**पुत्तलक** पु० पुत्त—बा० ल स्वार्थे क । पत्रादिनिर्मिते शवादिप्रतिमूर्त्तिभेदे पर्णनरशब्दे दृश्यम् शुद्धि०त० ।

**पुत्तली** स्त्री पुत्त—ल गौरा० ङीष् । वस्त्रपत्रमृदादिनिर्मिते (पुँतुल) ख्याते पदार्थे “अमावास्यां समासाद्य मध्यरात्रे विचक्षणः । पुत्तलीं स्वर्णमयीं कृत्वा दीपादिभिरलङ्कृताम्” उत्तरकामाख्यातन्त्रम् । स्वार्थे क अतइत्त्वम् । पुत्तलिका तत्रार्थे स्त्री ।

**पुत्तिका** स्त्री पुत् इति शब्दं तनोति तन—ड स्वार्थे क ह्रस्वः अत इत्त्वम् । क्षुद्रमक्षिकायाम् अमरः ।

**पुत्र(त्त्र)** पु० पू—क्त ह्रस्वश्च पुतो नरकभेदात् त्रायते त्रै—क वा । १स्वजन्यपुरुषे २स्वजन्यायां स्त्रियां स्त्री ङीष् । निरुक्ते तु २।११अन्या व्युत्पत्तिरुक्ता “पुत्र पुरु त्रायते निपरणाद्वा पुत् नरकं तस्मात् त्रायते वा” पृषो० । “पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः । तस्मात् पुत्र इति प्रोक्तः” मनुः । तेनास्य एकतकारता द्वितकारता च । तस्यापत्यं विदा०अञ् । पौत्र तदपत्ये पुंस्त्री० हरितादि०यूनि फक् । पौत्रायण पुत्रस्य यूथ्यपत्ये पुंस्त्री० राजदन्ता० पतिपशुशब्दाभ्यां समासे पतिपशुशब्दयोः परनि०। पत्युःपुत्रः पुत्रपतिः पशोः पुत्रः पुत्रपशुः । स च गौणमुख्यभेदेन द्वादशविधः द्वादशपुत्रशब्दे १८०१पृ०दृश्यम् अन्यथापि ते चतुर्विधाः यथा “ऋणसम्बन्धिनः केचित् केचिन्न्यासापहारकाः । रिपवश्च प्रियाश्चेति स्वकर्मवशवर्त्तिनः । भेदैश्चतुर्भिर्जायन्ते पुत्रा मित्राः स्त्रियस्तथा । भार्य्या पिता च माता च भृत्याः स्वजनबान्धवाः । स्वेन स्वेन हि जायन्ते सम्बन्धेन महीतले । न्यासापहरणं पूर्वं यस्य यस्य कृतं भुवि । न्यासस्वामी भवेत् पुत्रो गुणवान् रूपवान् भुवि । येन चापहृतो न्यासस्तस्य गेहे न संशयः । न्यासापहरणाद्दुःखं स दत्त्वा दारुणं गतः । न्यासस्वामी स पुत्रोऽभून्न्यासापहारकस्य च । गुणवान् रूपयांश्चैव सर्वलक्षणसंयुतः । भक्तिञ्च दर्शयेत्तस्य पुत्रो भूत्वा दिने दिने । प्रियवाक्यधरो वापि बहुस्नेहं प्रदर्शयेत् । स्वीयं द्रव्यं समुद्राह्य प्रीतिमुत्पाद्य चात्मनाम् । भुक्त्वा तु पोषणात्तेन तदादाय पुनर्व्रजेत् । यथा तेन प्रदत्तं तन्न्यासापहरणात् पुरा । दुःखमेवं महत् कृत्वा दारुणं प्राणनाशनम् । तादृशं तस्य दद्यात् स पुत्रो भूत्वा महागुणैः । अल्पायुषस्तथा भूत्वा मरणं यान्ति ते तथा । दुःखं दत्त्वा प्रयान्त्येवं प्रकृत्यैवं पुनः पुनः । यदाह पुत्र पुत्रेति प्रलापं हि करोति सः । तदा हास्यं करोत्येष कः स पुत्रो हि कस्य च । अनेनापि हृतो न्यासो मदीयः परिचारिणा । द्रव्यापहारोऽपि पिता पूर्वमद्यैव तस्य च । पिशाचत्वं मया दत्तमद्यैव हि दुरात्मनः । द्रव्यापहरणेनापि मम प्राणा गताः किल । दुःखेन महता चैव यथाहं पीडितः पुरा । तथा दुःखं प्रदत्त्वाहं द्रव्यं सुद्राड्यमुत्तमम् । भोगेन सर्वमादाय चिराद्विश्वास्य सौख्यवत् । गतोऽस्मि स्वच्छन्दाद्य कस्याहं सुत ईदृशः । न चैषोऽपि पिता पूर्वमद्यैव न च कस्यचित् । पिशाचत्वं मया दत्तमद्यैव च दुरात्मनः । एवमुक्त्वा प्रयात्येव तं प्रहस्य पुनः पुनः । प्रयात्यनेन मार्गेण दुःखं दत्त्वा सुदारुणम् । एवं न्यासस्य सम्बन्धात् पुत्राः केचित् भवन्ति वै । संसारे दुःखबहुला दृश्यन्ते यत्र तत्र हि १। ऋणसम्बन्धिनः पुत्रान् प्रवक्ष्यामि तवाग्रतः । ऋणं यस्य गृहीत्वा यः प्रयाति मरणं किल । अतस्तस्य सुतो भूत्वा भ्राता वाथ पिता प्रियः । मित्ररूपेण वर्त्तेत अन्तर्दुष्टः सदैव सः । गुणं नैव प्रपश्येत स क्रूरो निष्ठुराकृतिः । जल्पते निष्ठुरं वाक्यं सदैव स्वजनेषु च । नित्यमिष्टं समश्नाति भोगान् भुञ्जीत नित्यशः । द्यूतकर्मरतो नित्यं चौरकर्मणि नित्यशः । गृहाद्द्रव्यं बलाद्धर्त्ता वार्यमाणः प्रकुप्यति । पितरं मातरञ्चैव कुत्सते च दिने दिने । द्रावकस्त्रासकश्चैव बहुनिष्ठुरजल्पकः । वञ्चयित्वैव सुद्राञ्च हृत्वा सुखेन तिष्ठति । जातकर्मादिभिर्बाल्ये द्रव्यं गृह्णाति दारुणः । पुनर्विवाहसंयोगान्नानाभेदैरनेकधा । एवं संक्षीयते द्रव्यं नैवमेतद्ददात्यपि । गृहक्षेत्रादिकं सर्वं ममैव हि न संशयः । पितरं मातरञ्चैव वदत्येवं दिने दिने । सुदण्डैर्मूषलैश्चैव कशाघातैस्तु दारुणैः । मृते तु तस्मिन् पितरि तथा मातरि निष्ठुरम् । निःस्नेहो निर्घृणश्चैव जायते नात्र संशयः । एवंविधास्ततः पुत्रा भवन्ति च महीतले २। रिपुपुत्रं प्रवक्ष्यामि तवाग्रे द्विजपुङ्गव ! । बाल्ये वयसि सम्प्राप्ते रिपुवद्वर्त्तते सदा । पितरं मातरञ्चैव क्रीड़मानो हि ताड़येत् । ताड़यित्वा प्रयात्येवं